(1)

# अथसविग्रहअमरकोशात्तृतीयकांडप्रारंभः

(2)

स्वि·अ·को १ | श्रीगणेशायनमः विशेष्यनिघ्नैरिति ॥ वक्ष्यमाणवर्गानाह ॥ सामान्येकांडे ॥ साधारणत्वात् ॥ एतेनशक्षिमात्तत्तन्नामकावर्गाऊच्यंते ॥ एतैःकैः विशेष्यनिघ्नैः ॥ विशेष्यस्त्रीदारादि पूर्वोक्तंतन्नि-
घ्नंअधीनंयेषांतैः लिंगवचनैः सुकृत्यादिशब्दैः संकीर्णैः परस्परविजातीयार्थैः ॥ कर्मपारायणादिभिः ॥ नानार्थैश्च ॥ अनेकार्थेषुवर्तमानैर्नाकलोकादिभिः ॥ अव्ययैराकादिभिर्लिंगादि | काण्ड ३
संग्रहैः ॥ लिंगान्यादौयेषांतानितेषांसंग्रहाः ॥ आदिशब्दान्नामानि ॥ लंकाशेफालिकेत्यादीनितैः ॥ तेचवर्गा स्वतंत्रानेत्याह ॥ कीदृशाः वर्गाः ॥ वर्गसंश्रयाः वर्गाः पूर्वोक्तस्वर्गादिवर्गाः
संश्रयाःसंबंधिनोयेषांते १ प्रायशोरूपभेदेनअस्मिन्शास्त्रेलिंगनिर्णयः ॥ नहदेनानवर्गोपिस्यादितिभ्रमनिरासार्थंव्यापकंलक्षणमाह ॥ स्त्रीदारायैरिति ॥ यादृशैः स्त्रीलिंगत्वा

विशेष्यनिघ्नैःसंकीर्णैर्नानार्थैरव्ययैरपि लिंगादिसंग्रहैर्वर्गाःसामान्येवर्गसंश्रयाः ॥१॥
स्त्रीदारायैर्यद्विशेष्यंयादृशैःप्रकृतंपदैः गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्यभेदकाः २ ॥

दियुक्तैः स्त्रीदारायैः ॥ आदिनाकलत्रादि ॥ पदैर्यद्विशेष्यं स्त्रीदारादिरूपंयथाप्रकृतंप्रक्रांतंतस्यविशेष्यस्यभेदकाः व्यावर्त्तकाःगुणद्रव्यक्रियाविशिष्टाः शब्दास्तथास्युः ॥ विशेष्यस्ययाः
दृशौलिंगवचनेतादृशलिंगवचनाएवभवेयुरित्यर्थः ॥ तत्रगुणः सुकृतादिस्तद्विशिष्टोयथा ॥ सुकृतिनीस्त्री ॥ सुकृतिनोदाराः ॥ सुकृतिकलत्रं ॥ द्रव्यंदंडादितद्विशिष्टोयथा ॥ दंडिनी | १
स्त्री ॥ दंडिनोदाराः ॥ दंडिकलत्रं ॥ क्रियावचनादिव्यापारस्तद्विशिष्टोयथा ॥ पाचकास्त्री ॥ पाचकादाराः ॥ पाचकंकुलं २ ७ ७ ७

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

सुकृती सुकृतिमस्यास्ति इनिः ॥ पुण्यवान् पुण्यमस्यास्ति मतुप् ॥ धन्यः धनायअर्हः धनंलब्धेतियुक्तं धन्याधान्यामलक्योः स्याद्धन्यंपुण्यवतित्रिषितिविश्वमेदिन्यौ अयंभाग्य संपन्नस्य ॥ महेच्छः महतीच्छास्य गोस्त्रियोरितिन्हस्वः ॥ महाशयः महानाशयोस्य आशयस्यादभिप्रायेमानसाधारयोरपि हेउदारचित्तंयस्यतस्य ॥ हृदयालुः प्रशस्तंहृदयं यस्य ॥ सुहृदयः शोभनंहृदयमस्यास्ति मित्रत्वाविवक्षणाम्नहृद्भावः सहृदयइतिवापाठः तत्रहृदयेनसहेति बहुव्रीहिः प्राणिमात्रस्यतथात्वादत्र प्रशस्तपरत्वंहृदयशब्दस्य ईशि शब्दमनसः हृदयवान् हृदयिकइत्यपि ॥ महोत्साहः महानुत्साहोयस्य ॥ महोद्यमः महानुद्यमोस्य हेतुः साध्यकृत्येपिसाधनपरस्य ३ प्रवीणः प्रकृष्टावीणास्य यद्वावीणया प्र

सुकृतीपुण्यवान्धन्योमहेच्छस्तुमहाशयः हृदयालुः सुहृदयोमहोत्साहोमहोद्यमः ३ प्रवीणेनि
पुणाभिज्ञविज्ञनिष्णातशिक्षिताः वैज्ञानिकः कृतमुखः कृतीकुशलइत्यपि ४

गायंतिप्रगीयतेवा सत्वापेतिण्यंतादच् निपुणः निपुणति पुणकर्मणिशुभेकः अभिज्ञः अभिजानाति ॥ विज्ञः विजानाति उभयत्रापिआतश्चोपेतिकः ॥ निष्णातः ॥ निष्णानेग त्यर्थेतिक्तः ॥ शिक्षितः अशिक्षिष्ट शिक्षाविद्यापादानेकर्त्तरिक्तः वैज्ञानिकः विज्ञानबुद्धिः तत्रनियुक्तइतिठक् इत्याद्यूह्यं ॥ कृतमुखः कृतंमुखमस्य सर्वेषांकृतमुखत्वाद त्रकृतशब्दस्यसंस्कृतपरत्वं ॥ कृती कृतंकर्मप्रशस्तमस्य मत्वर्थेइतिः ॥ कुशलः कुशान्लातिकः कौपृथिव्यांशलतिवा शलचलने अच् कौशानयति चालयति शजका र्याणिवा कुशलः शिक्षितेत्रिषु क्षेमेचसुकृतेचापिपर्यासेचनपुंसकमितिविश्वमेदिन्यौ दशप्रवीणस्य ४ ७ ७ ७

(3)





पूज्यः पूज्यते पूजपूजायां आर्चोयत् ॥ प्रतीक्ष्यः प्रतीक्ष्यते ईक्षदर्शने यत् पूज्यः श्वशुरसंबंधयोरितिहैमः प्रतीक्ष्यः प्रतिपाल्येस्यात्पूज्येचेति हैमःहे ॥ सांशयिकः संशयमापन्नइति ठञ् यद्वा संशयविषयीभूतोऽर्थः सांशयिकइतिदीक्षिताः संशयापन्नमानसः संशयापन्नंमानसंयस्मिन् हे संदेहविषयस्य ॥ दक्षिणीयः दक्षिणामर्हति ॥ अर्हपूजायां दक्षिणार्हः ॥ दक्षिण्यः कडंकरेतिछयतो दाक्षिणइत्यपि अण् ॥ त्रीणिदक्षिणायोग्यस्य ५ वदान्यः वाचायावस्येतिवदति वदेरान्यः वदान्योदानशौंडेस्याच्चारुवादिनिवाच्यवत् वदन्यइत्यपि ॥ स्थूललक्ष्यः स्थूलैर्महद्भिर्लक्ष्यते ण्यत् स्थूलंकृदंलक्ष्यमस्येतिवा ॥ दानशौंडः दानेशौंडः शौंडोमत्तेपिविख्यातइतिविश्वः ॥ बहुप्रदः बहुप्रददाति प्रेदाज्ञइतिकः चत्वारिअतिदातुः ॥ जैवातृकः जीवति जीवेरातृकन् वृद्धिश्च जैवातृकः पुमान्सोमेऽपकायुष्मतोस्त्रिष्विति विश्वमेदिन्यौ ॥ आयुष्मान् अतिशयितमायुरस्य मतुप्प्रशस्तंच हे सायुषः ॥ अंतर्वाणिः अंतर्वाण्यस्य यद्वा अंतर्वाणयति वणशब्दे ण्यंतादच् शास्त्रवित् शास्त्रंवेत्ति क्विप् हे शास्त्रज्ञस्य ६ परीक्षकः परीक्षते ईक्षदर्शने ण्वुल् कारणिकः करणैश्चरति चरतीतिठक् आदिवृद्धिः करणंहेतुकर्मणोरित्युक्तं हे प्रमाणैरर्थनिश्चायकस्य ॥ वरदः वरंददाति कप्रत्ययः प्रसन्नेशांतचित्तेचवरदातुंकुमारिकाइतिहैमः ॥ समर्द्धकः समृध्नोति ऋधुवृद्धौ ण्वुल् हे वरणांदातरि ॥ हर्षमाणः हर्षति हृषुअलीके चानश् विकुर्वाणः विकुरुते शानच् प्रमनाः प्रकृष्टंमनोस्य ॥ हृष्टमानसः हृष्टंमानसमस्य चत्वारिहृष्टचेतसः ७

पूज्यःप्रतीक्ष्यःसांशयिकःसंशयापन्नमानसः दक्षिणीयोर्हदक्षिणार्हस्तत्रदक्षिण्यइत्यपि ५ स्युर्वदान्यस्थूललक्ष्यदानशौंडाबहुप्रदे जैवातृकःस्यादायुष्मानंतर्वाणिस्तुशास्त्रवित् ६ परीक्षकःकारणिकोवरदस्तुसमर्द्धकः हर्षमाणोविकुर्वाणःप्रमनाहृष्टमानसः ७

३

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

दुर्मनाः दुस्थितंमनोस्य ॥विमनाः विगतंविविधंवामनोस्य ॥अंतर्मनाः अंतर्मनोस्य त्रीणिउद्विग्नमनसः ॥उत्कः ॥उन्मनः ॥उद्गतंमनोस्य उच्छब्दात्स्वार्थेकन् हे उत्कंठितमनसः दक्षिणः दक्षते दक्षवृध्दौ शीघ्रार्थेच द्रुदक्षिभ्यामिनच् दक्षिणोदक्षिणोद्भूतसरलच्छंदवर्तिषु ॥अवामेत्रिषुयज्ञादिविधिदानेदिशिस्त्रियां ॥सरलः सरति सृगतौ अलच् सरलः पूतिकाष्ठेनार्थेदारावक्रयो स्त्रिषु ॥उदारः उत्कृष्टमासमंतादृच्छतिकः उदारोदात्तमहतोर्दक्षिणेप्यभिधेयवत् त्रीणिऋज्वाशयस्य ॥दात्रप्रोक्तरि दाताचासौभोक्ताच तत्रसुकलइत्येकं ॥सुकल्यते कलशब्दसंख्यानयोः खल् शोभनाकलास्येतिवा ॥तत्परः तत्परंउत्तमंयस्य तेनपूर्यतेवा पृपालनपूरणयोः अप् ॥प्रसितः पिञ्बंधनेक्तः ॥आसक्तः अतिशयेनसक्तः षंगेः क्तः त्रीणितात्पर्ययुक्तस्य ॥इष्टार्थोद्युक्तः इष्टम्वासावर्थश्चतत्रउद्युक्तः ॥उत्सुकः मदुद्योगेसुवतिभ्वादेः सौतिअदादेः सुनातिवास्वादेः षुप्रसवैश्वर्ययोः षुञ्अभिषवे वा

दुर्मनाविमनाअंतर्मनाःस्यादुत्कउन्मनाः दक्षिणेसरलोदारौसुकलोदात्तभोक्तरि ८ तत्परेप्रसितासक्ताविष्टार्थोद्युक्तउत्सुकः प्रतीतेप्रथितख्यात
वित्तविज्ञातविश्रुताः ९ गुणैःप्रतीतेसुकृतलक्षणाहतलक्षणौ इभ्यआढ्योधनीस्वामीत्वीश्वरःपतिरीशिता १०

तद्धिपिआगमानित्यत्वात्तुगभावः यद्वाउत्सुवति षूप्रेरणे हे इष्टार्थोद्यमवतः पंचापितत्पर्यायाइत्येके ॥प्रतीतः प्रतीयतेस्म इण्गतौक्तः ॥प्रथितः प्रथतेस्म प्रथप्रख्याने ॥ख्यातः आख्यायि ख्याप्रकथने ॥वित्तः आवेदि विद्लृलाभेक्तः ॥विज्ञातः व्यज्ञापि ज्ञाअवबोधनेक्तः यद्वाविजानाति ॥विश्रुतः व्यश्रावि श्रुश्रवणे इमेसर्वेक्तप्रत्ययांताः षट्प्रसिध्दस्य ९ कृतलक्षणः कृतंलक्षणंनामास्य लक्षणंनाम्निचिन्हेचेतिविश्वः ॥आहतलक्षणः आहतमत्यस्तंलक्षणमस्य आहतं ॥गुणितेपिस्यादितिविश्वः हे गुणैः प्रसिद्धस्य ॥इभ्यः इभमर्हति दंडादित्वात्यः इभ्योधनवतीभ्यात्युकरेण्वांसल्लकीतरावितिहेमचंद्रः ॥आढ्यः आध्यायतिके पृषोदरादिः ॥धनी बहुधनमस्यइनिः त्रीणिबहुधनवतः ॥स्वामी स्वमस्यास्ति स्वामीतिसाधुः स्वामिप्रभुविशेषयोरितिविश्वः ईश्वरः ईष्टेइशऐश्वर्ये वरच् इश्वरोमन्मथेशंभौनाथेस्वामिनिवाच्यवत् इतिविश्वमेदिन्यौ ॥पतिः पातिपारक्षणे पातेर्डतिः पतिर्धवेनाथिधीशोचेतिविश्वः ॥ईशिता तृच् ॥१०॥

अधिभूः अधिभवति क्विप् ॥ नायकः नयति नीञ् प्रापणे ण्वुल्तृचौइतिसाधु नायकोनेतरिश्रेष्ठोहारमध्यमणावपीतिविश्वहेमचंद्रौ ॥ प्रभुः प्रभवति विभौर्डुः ॥ परिवृढः परिवर्हति वृंहतिवा वृहवृंहिवृद्धौ प्रभौपरिवृढइतिसाधुः ॥ अधिपः अधिकंपाति आतश्चोपेतिकः दशप्रभो ॥ अधिकर्धिः अधिकाऋद्धिर्यस्य ॥ समृद्धः समृध्नोति ऋधुवृद्धौ अकर्मकत्वात्क्तः द्वे अतिसंपन्नस्य कुटुंबव्यापृतः कुटुंबेकुटुंबपोषणे ॥ व्यापृतः व्याप्रियतेस्म पृङ्व्यायामे अकर्मकत्वात्क्तः ॥ व्यापृतस्तत्परोयुक्तेवेतिवोपालितः ११ अभ्यागारिकः अभ्यागारेनियुक्तः अगारांताठन् अभिअधिकआगारिकोवा ॥ उपाधिः आधिंउपगतः उपाधिर्धर्मचिंतायांकुटुंबेव्यापृतेछले विशेषणेपुंसीतिविश्वमेदिन्यौ श्रीणिकुटुंबपोषणादिव्यापारयुक्तस्य ॥ वरांगरूपोपेतः सुसिंहसंहननइत्येकं अंगानिच रूपाणिचांगरूपाणिवराणिचतान्यंगरूपाणिचतैरुपेतः सिंहःश्रेष्ठंसंहननमस्य संहननेनसिंहइतिवाराजदंतादिः १२ यःसत्वसं

अधिभूर्नायकोनेताप्रभुःपरिवृढोधिपः अधिकर्द्धिः समृद्धःस्यात्कुटुंबव्यापृतस्तुयः ११ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्चपुमानयं वरांगरूपोपेतोयःसिंहसंहननोहिसः १२ निर्वार्यःकार्यकर्तायःसंपन्नःसत्वसंपदा अवाग्विमूकोऽथमनोजवसःपितृसन्निभः १३

पदासंपन्नःसन्कार्यकर्तासनिर्वार्यः ॥ सत्वस्यसंपत् तदाह व्यसनेऽभ्युदयेवापिस्थिरविकारंसदामनः तत्सत्वमितिचप्रोक्तंनयविद्भिर्बुधैः किल उद्यमंकुर्वन् कार्यंकरोति निश्चयेन-म्रियते धृञ्वरणे ण्यत् निर्धार्यइतिपाठेतु धृञ्धारणइतिधातुः संपन्नइत्यत्र संयुक्तइतिपाठः ॥ अवाक् नवाग्यस्य ॥ मूकः मूमितिकायति मूयतेबध्यतेवागस्य मूङ्बंधने वा ह्रलकादूकः द्वे ॥ मनोजवसः पैत्र्येकः मनोजववेगवत्यस्मिन् मनोजवइत्यपि ॥ मनोजवपितृसधर्माणइतिनाममाला ॥ पितृसन्निभः पितेवसम्यङ्भाति भादीप्तौ आश्चोपसर्गेइतिकः द्वेपितृसमस्य १३ ३

७ ७ ७ ७ ७ ७ ७

(5A)

सत्कृत्यालंकृतांकन्यांपरिणेत्रेयोददातिसः कुकुदइत्येकं कोकुति कुकआदाने पृषोदरादिः इत्याद्युक्तं ॥ लक्ष्मीवान् लक्ष्मीरस्यास्ति मतुप् लक्ष्मणात्वौषधीभेदे साक्ष्यामपियोषिति रामभ्रातरिपुंसिस्यात्सश्रीकेचाभिधेयवत् लक्ष्म्याअन्वेतिसाधुः लक्ष्मणः ॥ श्रीलः श्रीरस्यास्ति श्रियंलातिवा श्लीलइत्यपि ॥ श्रीमान् श्रीर्विद्यतेयस्य चत्वारिलक्ष्मीवतः ॥ स्निग्धः स्निह्यतिस्म स्निह्प्रीतौ क्तः ॥ वत्सलः वत्सेपुत्रादिस्नेहपात्रे ऽभिलाषोस्यास्ति हंस्नेहयुक्तस्य १४ दयालुः दयतेतच्छीलः आलुच् ॥ कारुणिकः करुणाशीलमस्य शीलमितिठक् ॥ कृपालुः कृपांलाति मनेतिडुः ॥ सूरतः सुभत्वयेदीर्घः सुरतइत्यपि चत्वारिदयाशीलस्य ॥ स्वतंत्रः स्वः आत्मातंत्रंप्रधानमस्य ॥ अपावृतः अपगतमावृतमावरणमस्य अप्रावृतस्त्व पहतेस्वतंत्रेपिचवाच्यवदितिविश्वमेदिन्यौ ॥ स्वैरी स्वेनइरितुंशीलमस्य ईरगतौ सुप्यजातौणिनिः स्वैरइत्यपि ॥ स्वच्छंदः स्वच्छंदोभिलाषोयस्य ॥ निरवग्रहः निर्गतोव

सत्कृत्यालंकृतांकन्यांयोददातिसकुकुदः लक्ष्मीवाल्लक्ष्मणः श्रीलः श्रीमान्स्निग्धस्तुवत्सलः १४ स्याद्दयालुःकारुणिकः कृपालुःसूरतःसमाः
स्वतंत्रोपावृतःस्वैरीस्वच्छंदोनिरवग्रहः १५ परतंत्रःपराधीनःपरवान्नाथवानपि अधीनोनिघ्नआयत्तो ऽस्वच्छंदोगृह्यकोप्यसौ १६

ग्रहान्नियमनात् पंचस्वच्छंदस्य १५ परतंत्रः परःतंत्रंप्रधानंयस्य ॥ पराधीनः परस्मिन्नधीनः ॥ परवान् परवःस्वाम्यस्यास्ति मतुप् ॥ नाथवान् भाग्वत् एवमपि ॥ अधीनः इनम धिगतः अधिउपरिइनोस्येतिवा ॥ निघ्नः निहन्यतेनिगृह्यते हंतेर्घञर्थेकः आयत्तः आयतेस्म यतीप्रयत्ने क्तेस्वेदितइतिनेट् ॥ अस्वच्छदः नस्वः छंदोस्य ॥ गृह्यकः गृह्यते ग्रहउ पादाने पदेनिक्यप् कः गृह्यकोनिघ्नकेच्छकइतिविश्वमेदिन्यौ पंचकंअधीनमात्रे एकेतुनवभिः पर्यायमाहुः १६ ७ ७ ७

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

सवि॰अ॰को ५ खलपूः खलं चत्वरं पुनाति पूञ्पवने क्विप् खलं भूस्थानकल्के क्षितिरिति विश्वः ॥ बहुकरः बहु करोति अच् हे भूसंमार्जनवतः ॥ दीर्घसूत्रः दीर्घं सूत्रं व्यवस्थायस्य सूत्रं तंतुव्यवस्थयोरि कांड ३
ति विश्वः ॥ चिरक्रियः चिरेणं क्रियायस्य हे विलंबेन क्रियासंपादकस्य ॥ जाल्मः जालयति जाल्यते वा जल अपवारणे बाहुलकात् मः जाल्मस्तु पामरे ऽसमीक्ष्यकारिणि चेति हैमः ॥ असमी-
क्ष्यकारी असमीक्ष्य ऽविचार्य कर्तुं शीलमस्य हे यो गुणदोषानविमृश्य करोति तस्य ॥ यः क्रियासु मंदो ऽलसः मूढो वा सत्कुंठ इत्येकं ॥ कुंठति कुठि चगति प्रतिघाते आलस्ये च १७ कर्मक्षमः
कर्मसु क्षमः ॥ अलंकर्मीणः कर्मणे क्रियायै अलं समर्थः अषडक्षीणेति खः हे क्रियाकरणे समर्थस्य ॥ क्रियावान् क्रियास्यास्तीति मतुप् एकं कार्मः कर्मशीलः कर्मशीलमस्य छत्रेति ण
प्रत्ययः स्त्रियां तु कार्मी ताच्छील्ये ङीप् हे कर्मफलमनपेक्ष्य प्रवृत्तस्य ॥ कर्मशूरः कर्मणि शूरः ॥ कर्मठः कर्मणि घटते कर्मणि घटोठच् हे प्रयत्नेन प्रारब्धकर्मपरिसमापकस्य १८

खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः जाल्मोऽसमीक्ष्यकारी स्यात्कुंठो मंदः क्रियासु यः १७ कर्मक्षमोऽलंकर्मीणः क्रियावान्कर्मसूद्यतः स कार्मः कर्म
शीलो यः कर्मशूरस्तु कर्मठः १८ भरण्यभुक्कर्मकरः कर्मकारस्तु तत्क्रियः अपस्नातो मृतस्नात आमिषाशी तु शाष्कुलः १९ बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः

भरण्यभुक् भरण्यं वेतनं भुंक्ते क्विप् कर्मण्यभुगित्यपि ॥ कर्मकरः कर्म करोति कर्मणि भृतौ टः इति हे मूल्येन कर्म कुर्वतः यः तत्क्रियः स कर्मकारकः तत्कर्मैव क्रियायस्य कर्म करोति क
र्मण्यण् ॥ अभृतक्रिय इत्यर्थः यो वेतनं विना कर्म करोति तस्यैकं ॥ अपस्नातः अपकृष्टस्नातः मृतस्नातः मृते स्नातः हे मृतमुद्दिश्य स्नातस्य ॥ आमिषाशी आमिषमश्नाति अश-
भोजने णिनिः ॥ शाष्कुलः शष्कुली शष्कमांसे पि मांसमात्रे पि सामता नाम्नि शेषइत्यण् स्वामी तु शाष्कल इति पठति तत्र पृषोदरादिः शष्कुलः शष्कमांसस्य पणिके पिशीताशि ४
नीति हैमः १९ बुभुक्षितः बुभुक्षा संजाता यस्य इतच् क्षुधितः क्षुध्यति स्म ॥ जिघत्सुः अत्तुमिच्छुः सनाशंसेति उः ॥ अशनायितः अशनस्येच्छा अशनाया सा संजाता ऽस्य चत्वारि
बुभुक्षितस्य ॥

(5A)

आक्षारितः आक्षार्यतेस्म क्षरसंचलने ण्यंतात्क्तः आक्षारोमैथुनंप्रत्याक्रोशोस्य इतिवा ॥ क्षारितः क्षारितः स्त्राविनेक्षारैरभिशस्तेपित्रिषु ॥ अभिशस्तः अभिशस्यतेस्म शस्त्रहिंसा यांक्तः श्रीणिमैथुननिमित्तंमिथ्यादूषितस्य ॥ संकसुकः संकसतीति कसगतौ उकन् ॥ अस्थिरः नस्थिरः हेचलस्वभावस्य ॥ व्यसनार्त्तः व्यसनेनार्त्तः ॥ उपरक्तः उपरज्यतेस्म रं-जरागेक्तः ॥ उपरक्तोव्यसनार्तेराहुग्रस्तेंदुसूर्ययोरितिविश्वः हेव्यसनपीडितस्य ॥ विहस्तः विक्षिप्तः हस्तोयस्य व्याकुलः कुलधातोरिगुपेतिकः ४३ विक्लवः विक्लवतेक्लुङ्गतौ अच् विह्वलः विह्वलतीति ह्वल चलने अच् हेशोकादिनागात्रभंगंप्राप्तस्य ॥ विवशः विरुध्दंवष्टि वशकांतौ अच् विवशास्त्रिष्ववश्यात्मादिष्टदुष्टधियोरपि ॥ अरिष्टदुष्टधीः अरिष्टेनदुष्टाधीर्यस्य हेआसन्नमरणस्य

आक्षारितः क्षारितोभिशस्तेसंकसुकोस्थिरे व्यसनार्त्तोपरक्तौद्वौविहस्तोव्याकुलौसमौ ४३ विक्लवोविह्वलः स्यात्तुविवशोऽरिष्टदुष्ट-धीः कश्यः कशार्हेसन्नध्देत्वाततायीवधोद्यते द्वेष्येत्वक्षिगतोवध्यः शीर्षच्छेद्यइमौसमौ विष्योविषेणयोवध्योमुसल्योमुसलेनयः ४५

चितलक्षणेनदूषितमतेः ॥ कश्यः कशामर्हति दंडादित्वाद्यः कश्यंकशार्हमद्यमपियोगात्कत्वात् ॥ कशार्हः कशावेत्रमर्हति अर्हइत्यच् हेताडनार्हस्य ॥ सन्नध्दे सन्नत्यतिस्म ण ह्यबंधनेक्तः ॥ वधोद्यते वधेउद्यतः तत्र आततायीत्येकं आततंयथातथाऽयितुंशीलमस्य अयगतौ सुपीतिणिनिः ४४ द्वेष्यः द्वेष्टुमर्हः द्विषअप्रीतौ ण्यत् ॥ अक्षिगतः अक्षिविषयंगतः शाक पार्थिवादिः हेद्वेषार्हस्य ॥ वध्यः वधमर्हति दंडादिभ्योयः यद्वाहंतुमर्हः हतोवधचेतियत् शीर्षच्छेद्यः ॥ शीर्षस्यच्छेदस्तमर्हति शीर्षछेदाद्यच्चेतियत् हेशिरछेदार्हस्य वध्यः वधमर्हति ॥ यो विषेणवध्यः हंतव्यः सविष्यइत्येकं नौवयइतियत् यः मुसलेनवध्यः समुसल्यः दंडादिः एकं ४५

(6)

सटि॰अ॰को॰ १ | शिश्विदानः शिश्विंदे श्विदिश्वैत्ये लिटः कानच् अनित्यत्वान्नमुन् ॥ अकृष्णकर्मा अकृष्णांशक्लंकर्मास्य हे पुण्य कर्मणः कृष्णकर्मेतिपाठांतरं तत्रतु हे पापकर्मणः अत्रश्विता वर्णेइति | कांड ३
धातोः श्वितेर्दश्चेत्यानच् दुत्वंस नोलुक्च श्वेतितुमिच्छति ॥ चपलः चपति चपसांत्वने कलच् चपलश्चोरकेचलइत्युक्तत्वात् क्षणिकेचिकुरः शीघ्रेपारदेमत्स्यरांतरे मीनेतुचप
लापिस्यात्तिपल्यांविद्युतिश्रियां पुंश्चल्यामपीतिहैमः ॥ चिकुरः चितिअव्यक्तं कुरति कुरशब्दे इगुपेतिकः चिकुरो ऽहौगृहे वभ्रौकेशेचंचलशैलयोः पक्षिद्वक्षभिदोश्चापिइतिहैमः
हे दोपमनिश्चित्यवधादिकमाचरतः ॥ दोषैकदृक् दोषएकस्मिन्दृक् ज्ञानंयस्य ॥ पुरोभागी पुरः पूर्वभजते भजसेवायां धिनुण् हे दोषैकग्राहस्य ॥ निकृतः निकृंतति कृतीछेदने इ
गुपेतिकः निकृतंविमलब्धेस्याच्छठेविप्रकृतेत्रिषित्युक्तत्वात् ॥ अनृजुः नऋजुः ॥ शठः शठति शठकैतवे शठोमध्यस्थपुरुषे धूर्त्ते धत्तूरकेपिचेतिहेमचंद्रः त्रीणिवक्राशयस्य ४६ कर्णेजपः

शिश्विदानोकृष्णकर्मा चपलश्चिकुरः समौ दोषैकदृक्पुरोभागी निकृतस्त्वनृजुः शठः ४६ कर्णेजपः सूचकः स्यात्पिशुनोदुर्जनः खलः नृशं
सो घातुकः क्रूरः पापो धूर्त्तस्तु वंचकः ४७

कर्णेजपति जपव्यक्तायांवाचि स्तंबेर्तिअच् ॥ सूचकः सूचयति सूचपैशून्ये एवुल् सूचकस्तु कथकेसीवनद्रव्येमार्जारेवायसेपिचेतिहैमः हे कर्णेपरापवादंवदतः विस्मृतबोधकस्ये
तिकेचित् ॥ पिशुनः पिंशति पिशअवयवे उनन्सचकित् पिशुनंकुंकुमेपिचेत्यन्यत्रोक्तं पिशुनंतु कपिवक्त्रेच काकेनासूचकक्रूरयोस्त्रिषु पृच्छायांपिशुनारूयोस्यादितिविश्वमेदिन्यौ ॥
दुर्जनः दुष्टश्चासौ जनश्च ॥ खलः खलति खलसंचलने अच् खंछिद्रं लातिवा आतइतिकः खलः कल्केक्षितिस्थानेक्रूरेकर्णेजपे ऽधमेइतिहेमचंद्रमेदिन्यौ त्रीणिपरस्परभेदकस्य गुरूच
रणात्तु सूचकपर्याया एवैतानाहुः ॥ नृशंसः नॄनृशंसति शंसहिंसायां कर्मण्यण् ॥ घातुकः हननशीलः लषेत्युकञ् ॥ क्रूरः कृंतति कृतीछेदने रकिधातोः क्रूआदेशः क्रूरस्तु कठिनेघोरेनृशंसेप्य | १
भिधेयवदितिविश्वः ॥ पापः पापमस्यास्ति मत्वर्थेअच् चत्वारिपरद्रोहकारिणः ॥ धूर्त्तः धूर्वति हिनस्ति धुर्वीहिंसायां क्तेवलोपः धूर्त्तस्तु खंडलवणे धत्तूरे धत्तूरमायिनोरितिहेमचंद्रः ॥ वंचकः वं
चयति वंचुगतौ ण्यंतात्ण्वुल् वंचकस्तु खले धूर्त्तेग्यहवभ्रौचजंबुकेइतिविश्वमे॰ हेप्रतारणशीलस्य ४७

(6A)

अज्ञः नजानाति ज्ञ्रुपेतिकः अज्ञश्चजडमूर्खयोरितिविश्वः ॥ मूढः मुह्यतिस्म मुहवैचित्त्येक्तः मूढस्तुतंभितेजडेइतिविश्वः मुग्धइत्यपिस्यात् पात्वविकल्पात् यथाजातः जातंजन्मकालविशेषमनतिक्रम्यवर्त्तते तदस्यास्ति अर्शआद्यच् ॥ मूर्खः मुह्यति खमत्यायानः ॥ वैधेयः विधेयंविधानं तस्यायमधिकारी तस्येदंइत्यण् ॥ बालिशः बालिशस्तुशिशौमूर्खइत्युक्तत्वात् पञ्चमूर्खस्य ॥ कदर्यः कुत्सितोऽर्यः कुगतीतिसमासः कोः कद्नत्पुरुषेइतिकत् ॥ कृपणः कृपांकरोति यद्वाकृप्यते कृपाविषयीक्रियते कृपूसामर्थ्ये बाहुलकात्साधुः इत्याद्युत्युं: क्षुद्रः क्षुणत्ति क्षुदिरसंपेषणे स्फायितंचीतिरक् तदुक्तंहेमचंद्रे क्षुद्रोदरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोः क्षुद्राव्याधीनटिव्यंगावहतीसरघासुच चांगेरिकायांहिंस्रायांमक्षिकामात्रवंश्ययोरिति ॥ किंपचानः किंपचति ताच्छील्येतिचानश् ॥ मितंपचः मितनखेतिखच् यद्वा किंपचश्चनमितंपचइतिछेदः तत्रतु नमितंपचो ऽमितंपचः तद्भिन्नोनमितंपचः पचाद्यच्

अज्ञेमूढयथाजातमूर्खवैधेयबालिशाः कदर्येकृपणक्षुद्रकिंपचानमितंपचाः ४८ निस्वस्तुदुर्विधोदीनोदरिद्रोदुर्गतोपिसः वनीपको-
याचनकोमार्गणोयाचकार्थिनौ ४९

पंचयोधर्मात्मपुत्रदारादिकंपीडयन् लोभादर्थसंचयंकरोतितस्य ४८ निस्वः निर्गतंस्वमस्य स्वान्निष्क्रांतोवा ॥ दुर्विधः दुस्स्थाविधाप्रकारःसमृद्धिर्वास्य तदुक्तंकोशांतरे दुर्विधोवाच्यलिंगःस्याद्दुर्गतेपिखलेपिच ॥ दीनः दीयतेस्म दीङ्क्षये गत्यर्थेतिक्तेनत्वं ॥ दरिद्रः दरिद्राति दरिद्रादुर्गतौ ण्वुल्त्वचावितिस्मश्चेसर्वधातुभ्योच् इतिवचनादच् यत्तुटिप्पण्यांपचाद्यजितितच्चिंत्यं इद्दरिद्रेतिसूत्रस्थमहाभाष्यविरोधात् इतिसूरिभिस्तत एवउत्थंइतिगुरुवआचार्याः ॥ दुर्गतः दुर्गच्छतिस्म गत्यर्थेक्तः पंचदरिद्रस्य ॥ वनीयकः वनिमिच्छंतिवनीर्याच्ञा. वनिंइच्छतिक्यच् ण्वुल् वनीयकइतिपाठेतु वनींपाति क्यजंताक्विप् ॥ याचनकः याचति टुयाचृयाच्ञायां ल्युःस्वार्थेकः ॥ मार्गणः मार्गति मार्गअन्वेषणे बहुलमेतिग्युच् ॥ याचकः याचति ण्वुल् अर्थी अर्थोस्यास्ति इनिः पंचयाचकस्य ४९ ७ ७ ७

(७)

सवि·अ·को· १०

कांड ३

अहंकारवान् अहंकारोस्यास्ति मतुप् अहंशुभमिति मांतमव्ययं ॥ अहंयुः अहंविद्यतेयस्य अहंशुभेतियुस्  द्वे अहंकारिणः ॥ शुभंयुः शुभमस्यास्ति युस् ॥ शुभान्वितः शुभेनान्वितः
द्वे शुभयुक्तस्य मातापित्रादिदृष्टकारणनिरपेक्षाअदृष्टसहकृतेभ्योणुभ्योजातायेदेवास्तेदिव्योपपादुकाउच्यंते उपपद्यंते पदगतौ उकञ् दिविभवाः द्युमेतियत् तेचतेच नारकव्याद्य
त्तयेदिव्यपदं एकं ॥ नृगवाद्याः नाचगौश्चाद्यौयेषां आद्यशब्देनखराश्वादीनांग्रहणं ॥ जरायुजाः स्युः जरायोर्गर्भाशयाज्जाताः एकं ५० । कृमिदंशाद्याः कृमिश्चदंशश्चाद्यौयेषां आद्य
शब्देनमशकमत्कुणादिग्रहणं ॥ स्वेदजाः स्युः स्वेदहेतुत्वादूष्मास्वेदः ततोजाताः स्वेदजाः ॥ पक्षिसर्पादयः पक्षीचसर्पश्चआदीयेषां आदिशब्दात् नक्रमत्स्यपिपीडिकादयः ॥ अंड

अहंकारवानहंयुः शुभंयुस्तुशुभान्वितः दिव्योपपादुकादेवानृगवाद्याजरायुजाः ५० स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोंडजाः इतिप्रा
णिवर्गः उद्भिदुस्तरुगुल्माद्याउद्भिदुद्भिज्जमुद्भिदं ५१

जाः अंडेभ्योजाताः एकं इतिप्राणिवर्गः ॥ तरुगुल्माद्याः तरुश्चगुल्मश्चाद्यौयेषां आद्यशब्देनतृणौषधिलतादिग्रहः ॥ उद्भिदः उच्यंते एकं भुवंउद्भिंदंति भिदिरविदारणे द्वेउद्भि १०
त्पर्यायावाह ॥ उद्भिज्जं उद्भिदोजातं ॥ उद्भिदं उद्भिनत्ति इगुपेतिकः ५१ ७ ७ ७ ७ ७

(7A)

स्कंदरं स्कंद्यते दृश्यादरे यहर्षाद्विनिअप् यद्वा स्कउनत्ति चित्तं द्रवीकरोति उंदीक्लेदने बाहुलकादरःशकंध्वादिः स्त्रियांगौरादिः ॥ रुचिरं रोचते रुचदी प्तावभिप्रीतौच ॥ किरच् ॥ चारु चरति चित्ते चरगतौ भुण् तदुक्तं विश्वप्रकाशे चारुर्बृहस्पतौ पुंसिशोभनेत्वभिधेयवदिति ॥ स्रुषमं स्रुशोभनं समं सर्वमस्य स्रुविनिर्दुर्भ्यइतिषत्वं ॥ साधु साध्नोति साधेरुण् तदुक्तं हेमचंद्रे साधुर्जैनेमुनौवार्धुषिके सज्जनरम्ययोरिति ॥ शोभनं शोभते शुभदीप्तौ अनुदात्तेतियुच् शोभनं योगभेदेनास्कंदरेवाच्यलिंगकइतिकोशांतरात् ॥ कांतं कम्यतेस्म कमुकांतौ क्तप्रत्ययः यद्वा कनतिस्म कनीदीप्तादौक्तः तदाह कांतास्याच्चप्रियंगौस्त्रीशोभनेविधुनाधवे लोहेचचंद्रसूर्यायःपर्यायात्तशिलास्कचेतिविश्वमेदिन्यौ ॥ मनोरमं मनोरम

स्कंदरंरुचिरंचारुस्रुषमंसाधुशोभनं कांतंमनोरमंरुच्यंमनोज्ञंमंजुमंजुलं ५२ तदासेचनकंतृप्तेर्नास्त्यंतोयस्यदर्शनात् अभीष्टेऽभी-
प्सितंहृद्यंदयितंवल्लभंप्रियं ५३

यति रमक्रीडायां ण्यंतात्कर्मण्यण् मनोहरमितिपाठेतु मनोहरति ॥ रुच्यं रोचते रुच्यतेवा राजसूयेतिसाधुः ॥ मनोज्ञं मनसाजानाति इगुपधेतिकः मंजु मज्यते मजिध्वनौइतिसौत्रोधातुः बाहुलकादुः ॥ मंजुलं मंजुमंजुत्वंलाति कः मंजुलंचजलांतर इत्युक्तत्वात् तदुक्तं हेमे रम्येकुंजेमंजुलस्त्त्दात्यूह इति द्वादशस्कंदरस्य० ५२ यस्यदर्शनात् तृप्तेरंतोनास्ति तदासेचनकंस्यात् असेचनकमपि नसिच्यतेमनोत्र षिचक्षरणे ॥ अभीष्टं अभीलइष्यतेस्म इषइच्छायांक्तः ॥ अभीप्सितं अभ्याप्तुमिष्यतेस्म आप्लृव्याप्तौक्तः ॥ हृद्यं हृदिप्रियं यत् तदुक्तंविश्वप्रकाशे हृद्यंधवलजीरेचत्वष्टप्रियेत्हृद्वेपिच वशाकृद्देदमंत्रेचत्हृद्योद्ध्यारण्यमेषज इति ॥ दयितं दय्यतेस्म दयदानादौक्तः वल्लभं वल्लते वल्लतेवा वल्लसंवरणे अभच् तदुक्तंविश्वप्रकाशे वल्लभोदयितेध्यक्षेसलक्षणतुरंगमइति ॥ प्रियं प्रीणाति प्रीञ्तर्पणे तदुक्तं हेमे प्रियोविध्यौषधेत्हृद्येधवेइति षडभीष्टस्य ५३ ७ ७

निकृष्टः निकृष्यतेस्म कृषविलेखनेक्तः॥ प्रतिकृष्टः प्रतिकृष्यतेस्म ॥ अर्वा ऋच्छति ऋच्छगतौ वनिप् अर्वातुरंगमेपुंसिकुत्सितेवाच्यलिंगकइति कोशांतरेउक्तत्वात्॥ रेफः रि
फ्यते रिफकत्थनयुध्द्निंदाहिंसादानेषु अकर्तरिशिति घञ् तदुक्तंविश्वप्रकाशे रेफोवर्णेपुंभिस्यात्कुत्सितेवाच्यवत्पुनरिति रेपोपिस्यादेव तदेवाह रेपःस्यान्निंदितेक्रूरइतिविश्व
प्रकाशः याप्यः याप्यते यापापणे याप्यंतुयापनीयेस्यान्निंदितेप्यभिधेयवदितिकोशांतरेउक्तं ॥ अवमः अवत्यस्मादात्मानं अवरक्षणादौ॥ अधमः उभौनिपातितौ तदुक्तंविश्वे
अधमःस्याद्गर्ह्यऊनइति॥कुपूयः कुत्सितंपूयते पूयीविस्मरणे अच् पृषोदरादित्वात् अलोकपूयइत्यपि॥ कुत्सितः कुत्सासंजातास्य इतच् अवद्यः खेटः खेटति खिदत्रा-

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ५४ मलीमसंतुमलिनंकच्चरंमलदूषितं पू
तंपवित्रंमेध्यंचवीध्रंतुविमलात्मकं ५५

से पचाद्यच् तदुक्तंकोशांतरे खेटःकफे ग्रामभेदेचर्मण्यस्त्रधनेत्रिषु ॥ गर्ह्यः गर्ह्यते गर्हकुत्सायां ण्यत्॥ अणकः अणति अणशब्दे आणकइत्यपि त्रयोदशाधमस्य
५४ मलिमसं मलोस्यास्ति इमंसच् तदुक्तंविश्वमेदिन्ययोः मलीमसंतुमलिनेपुष्पकासीसलोहयोरिति ॥ मलिनं शटेवसंतेधत्तूरेमलिनंकृष्णदोषयोरिति कोशांतरे तदुक्तंच
मलिनीरजस्वलायांचेतिहेमः॥ कच्चरं योगविभावात् कन् कुत्सितंचरति अच्॥ मलदूषितं मलेनदूषितं चत्वार्यनुज्ज्वलस्य पूतं पुनाति॥ क्तः॥ पवित्रं इत्रः ॥ मेध्यं मृमेधनार्हे मेधृसं ११
सेचण्यत् त्रीणि ॥ वीध्रमित्येकं॥ विमलात्मकं विमलआत्मास्वभावोयस्य हे स्वभावनिर्मलस्य विमलार्थकमित्यपिपाठः ५५ ७ ७ ७

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(8A)

निर्णिक्तं निर्णिज्यतेस्म णिजिरशौचपोषणयोः क्तः ॥ शोधितं शोध्यतेस्म शुध शौचे क्तः ॥ मृष्टं मृज्यतेस्म मृजूशुद्धौ क्तः ॥ निःशोध्यं निष्क्रांतंशोध्यमस्मात् शोध्यान्निष्क्रांतमितिवा ॥ अनवस्करं नावस्करोत्र पंचापनीतमलस्य ॥ असारं नसारोत्र ॥ फल्गु फलति फलिपाटीतिसाधुः तदुक्तंविश्वे फल्गुत्वसारेभिधेयवत् द्वे निर्बलस्य ॥ शून्यं शुनेहितं शून्यंविंदौत्वन्निर्जि नइत्युक्तत्वात् तदुक्तंचहैमे शून्यातुनलिकाइति शून्यमित्यपि शुनः संप्रसारणंवाचदीर्घइतियत् ॥ वशिकं उश्यते वशकांतौ ॥ तुच्छं तुदाव्यथयाछ्यति छोछेदने मुलविभुजादिः रिक्तकं भिच्यतेस्म क्तः चत्वारिरिक्तस्य ५६ प्रधानं प्रदधाति ल्युटयुज्वा तदुक्तंकोशांतरात् प्रधानंस्याच्महामात्रेप्रकृतौपरमात्मनि प्रज्ञायामपिचक्लीबमेकत्वेतूत्तमेसदेति ॥ प्रमुखः प्रकृष्टमुखमस्य तदुक्तंहैमे प्रमुखंप्रथमेमुख्यइति प्रवेकः प्रविच्यते विचिरपृथग्भावे घञ् अनुत्तमः नोत्तमोस्मात् ॥ उत्तमाः अतिशयेनोत्कृष्टः इत्यात्मूत्वं उत्कृष्टार्थवृत्तेरुच्छब्दात्तमप् ॥

निर्णिक्तंशोधितंमृष्टंनिःशोध्यमनवस्करं असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके ५६ क्लीबेप्रधानंप्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्यव रेण्याश्चप्रवर्होनवराध्र्यवत् ५७ पराध्र्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियं श्रेयान्श्रेष्ठःपुष्कलःस्यात्सत्तमश्चातिशोभने ५८

मुख्यः मुखमिव शाखादित्वात्यः ॥ वर्यः वर्यते वरईप्सायां अचोयत् ॥ वरेण्यः व्रियते वृञ्वरणे एण्यः ॥ प्रवर्हः प्रवर्हति वृहवृध्दौ अच् ॥ अनवराध्र्यः अवरस्मिन्नर्धेभवः नअवराध्र्यः अर्धा द्यत् परावराधमोत्पूर्वाच्चयत् ५७ पराध्र्यः परस्मिन्नर्धेभवः ॥ अग्रः अगति अगकुटिलायांगतौ रत् तदुक्तंकोशांतरे अग्रंपुरस्तादुपरिपरिमाणेबलस्यच आलंबनेसमूहेच प्रांतेचस्यान्नपुं सकं ।अधिकेच प्रधानेचप्रथमेचाभिधेयवत् ॥ प्राग्रहरः प्रकृष्टमग्रंप्राग्रंहरति हरतेरित्यच् ॥ प्राग्र्यः प्राग्रेभवः यत् ॥ अग्रीयः घच्छौचेतिद्वयंसाधु अग्रेभवः ॥ अग्रियः सप्तदशप्रधानस्य त्रप्रधानंनित्यंक्लीबे ॥ श्रेयान् इयसुन् अतिशयेन प्रशस्यः ॥ श्रेष्ठः श्रेष्ठोवरेकुबेरेचेतिहैमः इष्ठन् ॥ पुष्कलः पुष्यति पुषपुष्टौ पुषेः कित् कलश्चेतिकलन् ॥ सत्तमः अतिशयेनसन् तदुक्तंकोशां तरे सत्तमः स्यात्पूज्यतमेसाधीयस्युत्तमेत्रिषु ॥ अतिशोभनः अतिशायेनशोभनः पंचअत्यंतशोभनस्य ५८

व्याघ्रदय एतेशब्दाउत्तरपदे ॥ श्रेष्ठार्थगोचराः श्रेष्ठार्थोगोचरोविषयोयेषांते क्वचिद्दाचकाइतिपाठः यथापुरुषव्याघ्रः पुरुषः व्याघ्रइव पुरुषश्रेष्ठइत्यर्थः आद्यशब्देनसोमा दीनांग्रहणं त
द्यथा नृसोमः व्याघ्रादिराकृतिगणः उपमितंव्याघ्रादिभिः सामान्यप्रयोगे इतिविशेष्यस्यपूर्वनिपातेव्याघ्रादेरुत्तरपदत्वं ५९ अमाग्र्यं प्राग्र्याद्भिन्नं प्रधानादन्यत् ॥ द्वयहीने हाभ्यांही
ने ग्यपभग्रधानस्य ॥ विशंकटं वेःशंकटच् ॥ पृथु प्रथने प्रथप्रख्याने तदुक्तंहेमचंद्रे पृथुर्विशालेभूपालेवाष्पिकाकृष्णाजीरयोरिति ॥ बृहत् बर्हति बृहद्वृद्धौ अतिप्रत्ययः ॥ विशालं शाल
च् विशालात्विंद्रवारुण्यामुज्जयिन्यांतुयोषिति नृपद्रक्षभिदोःपुंसिपृथुलेत्वभिधेयवदितिविश्वमेदिन्यौ ॥ पृथुलं पृथुत्वमस्यास्ति मत्वर्थेलच् पृथुलंलातिवा ॥ महत् महति महपूजा
यां वर्तमानेइतिसूत्रेनिपातितः ६० वड्रं वलते वलसंवरणेसंचरणेच रक्कुंडलयोनैकत्रस्मरणं ॥ उरुः ऊर्णोतिऊर्णुञ् आच्छादने नुलोपेह्रस्वः ॥ विपुलं विपोलति पुलमहत्वे इगुपेति

स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थगोचराः ५९ अमाग्र्यंद्वयहीनेद्वेअप्रधानोपसर्जने विशंकटंपृथुबृ
हद्विशालंपृथुलंमहत् ६० वड्रोरुविपुलंपीनपीव्नीतुस्थूलपीवरे स्तोकाल्पक्षुल्लकाःसूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु ६१

कः तदुक्तंविश्वे विपुलंपृथुलेगाधेमेरुपश्चिमभूधरेइति नवविनीर्णस्य ॥ पीनं प्यायतेस्म ओप्यायीवृद्धौ क्तेनत्वं ॥ पीव प्यायते प्यैङ्वृद्धौ क्वनिप्संप्रसारणं स्त्रीपीवरीस्यात् ॥ स्थूलं
स्थूलयति स्थूलबृंहणे अच् तदुक्तंहैमे स्थूलः पीनेजडेइति पीवर प्यायते निपातः तदुक्तंहेमचंद्रे पीवरः स्थूलकूर्मयोरिति चत्वारिस्थूलस्य ॥ स्तोकः स्तुच्यते ष्टुचप्रसादे घञ् ॥ अल्पः
अल्प्यतेवार्यते अलभूषणादौ पः ॥ क्षुल्लकः क्षोदनं क्षुदिरसंपेषणे संपदादिः लातेःकः परसवर्णः स्वार्थेकः इत्याद्यूर्ध्वं तदाह क्षुल्लकस्त्रिषुनीचेल्पेइति श्लक्ष्णं श्लिष्यते श्लिष्यतिवा श्लिषआलिं १२
गने श्लिषेरच्चोपधायाइतिसाधुः सूक्ष्मं सूच्यते सूचपैशून्ये सूचेःस्मन् सूक्ष्मंस्यात्कतके ऽध्यात्मेपुंस्यणौत्रिषुचाल्पकइतिविश्वेउक्तं ॥ दभ्रं दभ्यते दंभदंभने रक् ॥ कृशं कृश्यतेस्म कृशतनूक
रणे अनुपेतिसाधुः ॥ तनु तन्यते तनुविस्तारेउः तदुक्तंविश्वमेदिन्ययोः तनुःकायेत्वचिस्त्रीस्यात्रिष्वल्पेविरले कृशेइति. ६१

(9A)

मात्रा मीयते माङ्माने ष्ट्रन्टाप् मात्रंत्वव धृतौकात्स्न्येंकालेर्थेमात्रा परिछदे अक्षरावयवेद्रव्येमानेल्पेकर्णभूषणे कालेवृतेचेतिहैमः॥ त्रुटिः त्रुट्यते त्रुटछेदने इन्कित् ॥लवः लूयते लूञ् छेदने अप् ॥ लेशः लिशति लिशगतौ लिश्यतेवा अच् घञ्वा ॥ कणः कणति कणनिमीलने अच् कणोधान्यांशलेशयोरित्यल्पत्वात् कणाजीरकपिप्पल्योरितिहैमचंद्रश्च ॥ अणुः अणति अण्यतेवा अणशब्दे अणमेत्युः अणुमीत्यल्पयोरितिहैमः लवादयः पुंसि तत्रस्त्रियोमात्रात्रुटीश्च त्रुटीतिङीबंतोपिकचित् एकादशासूक्ष्मस्य स्तोकाद्यणवंता एकार्थाइतिकेचित् शेषंविशेषनिघ्नं ॥ अल्पिष्ठं अतिशयेनअल्पं ॥ अल्पीयः ॥ कनीयः अतिशयेनअल्पं कनिष्ठं इत्यपि ॥ अणीयः अतिशयेनअणुः ईयसुन् चत्वार्यत्यल्पे ६२ प्रभूतं प्रभवतिस्म क्तः तदुक्तंहैमे प्रभूतगुरुस्ते भाज्यइति ॥ प्रचुरं प्रचोरति चुरस्तेये णिजभावेइगुपेतिकः ॥ भाज्यं प्रवीयते अज

स्त्रियांमात्रात्रुटिःपुंसिलवलेशकणाणवः अत्यल्पेल्पिष्ठमल्पीयःकनीयोणीयइत्यपि ६१ प्रभूतंप्रचुरंप्राज्यमदभ्रंबहुलंबहु ॥
पुरुहःपुरुभूयिष्ठंस्फारंभूयश्चभूरिच ६३

गतौ ण्यत् यद्वा प्रकर्षेणाज्यतेकाम्यते अजूव्य क्त्यादौ क्यप् ॥ अदभ्रं दभ्रादन्यत् नञ्समासः नलोपः बहुलं बहून्लाति बहुलानीलिकायांस्यादेलायांदिविपोषिति कृत्तिकास्त्रियांभूम्निविहायसिनपुंसकं पुंस्यग्नौकृष्णपक्षेनवाच्यवत्प्राज्यकृष्णयोरितिविश्वमेदिन्यौ ॥ बहु बहते बहिवृद्धौ उःनलोपः तदुक्तंविश्वे बहुत्र्यादिसंख्यासुविपुलेत्वभिधेयवदिति ॥ पुरुहं पुरून्हंतिगच्छति डः यद्वा पुरूञ्जहाति जिहीतेवा कः पुरुहू इत्यपि पुरुहः पुरुह्वे पुरुह्वः एवं पुरुहुश्चक्लीबे पुरु पिपर्त्तिपूर्यतेवा पृपालनपूरणयोः कुप्रत्ययः उत्वं तदुक्तंहैमे पुरुःप्राज्येभिधेयवत् पुंसिस्याद्देवलोकेचनृपभेदपरागयोरिति ॥ भूयिष्ठं अतिशयेनबहु बहोर्लोपइतिसाधुः ॥ स्फारं स्फायते स्फायीवृद्धौ रक्प्रत्ययःलोपः स्फिरमित्यपिपाठः तदुक्तंहेमचंद्रे स्फारस्फरकादीनांबहुर्थेविपुलेपिचेति ॥ भूयः बहुशब्दात्ईयसुन्ईलोपःप्रकृतेर्भूआदेशः भूरि भ्रिन् अतिशयेनबहु भूवशाद्विग्रहः तदुक्तंहैमे ॥ भूरिस्यात्प्रचुरेस्वर्णेइति द्वादशबहुलस्य ६३

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सवि·अको येषांसंख्येयानांसंख्याशतादिकात् परानंक्रमेणपरः शताद्याः स्युः तेचपरश्शताः शतात्परे ॥ आद्येनपरस्सहस्राः एवंकं राजदंतादित्वाच्छतसहस्रयोः परनिपातः पारस्करा कांड
१३ दित्वात्सुट् ॥ विशेष्यनिघ्नत्वाद्वाच्यलिंगता ॥ गणनीयं गण्यते गणसंख्याने अनीयर ॥ गणेयं चिंतिपूजीतिज्ञापकादिनासिद्धस्यगतिनिश्चिंतनीया ईगणयितुंशक्यस्य ॥ सं ३
ख्यातं संख्यायतेस्म ख्याप्रकथने चक्षिङवा ह्वे संख्याकृतस्य ॥ समं सम्मति षम्रवैकुव्ये अच् ॥ सर्वं सरति सृगतौ यद्वा सर्वति सर्वगतौ सर्वार्थेसर्वभाग्य समासंदत्सरे-
स्त्रियामित्यक्तत्वात् तदुक्तंचविश्वे सर्वंसाधुसमानेषुसमंस्यादभिधेयवदिति ६४·विश्वं विशति विशप्रवेशने क्वन् तदुक्तंकोशांतरे विश्वंकृत्स्नेचभुवनेविश्वेदेवेषुनाग

परःशताद्यास्तेयेषांपरासंख्याशतादिकात् गणनीयेतुगणेयंसंख्यातेगणितमथसमंसर्वं ६४
विश्वमशेषंकृत्स्नंसमस्तनिखिलाखिलानिनिःशेषं समग्रंसकलंपूर्णमखंडंस्यादनूनके ६५

रे विश्वाप्यतिविषायांस्यात् ॥ अशेषं नशेषोस्य ॥ कृत्स्नं कृत्येते कृतीवेष्टने कृत्यशृष्यांइतिसाधुः कृत्स्नंसर्वांबुकुक्षिषु ॥ समस्तं समस्यतेस्म असुक्षेपणे क्तः ॥
निखिलं निरस्तंखिलमस्मात् ॥ अखिलं नखिलमस्य ॥ निःशेषं निष्क्रांतंशेषंयस्मात् ॥ समग्रं संगतमग्रमस्य समग्रंसतेवा ग्रसुअदने अन्येष्वपीतिडः ॥
सकलं कलाभिः सह ॥ पूर्णं पूर्यतेस्म पूरीआप्यायने क्तः पूर्णःशद्बेसमयेनापूरितेत्वभिधेयवत् पूर्वमित्यपिपाठः तत्रपूर्वति पूर्वपूरणे ॥ अखंडं नखंड्यते खडि १३
भेदने घञ् ॥ अनूनकं ऊनयति ऊनपरिहाणे अच् चतुर्दशसमयस्य ६५ ७ ७ ७ ७ ७

(10A)

घनं हन्यते हनहिंसागत्योः हंतेरप् घनादेशः घनःसांद्रे दृढे दार्व्यविस्तारेसुद्गरेंबुदे संघेसुस्ते घनंमध्येनृत्यवाद्यप्रभेदयोरितिहेमचंद्रः ॥ निरंतरं निर्गतमंतरंयस्मात् निर्गतमं
तरमस्मिन्वा ॥ सांद्रं सहअंद्यते अंदिबंधने बारुलकाद्रक् त्रीणिनिबिडस्य ॥ पेलवं पिलभेदने घञ् पेलोस्यास्तीतिवः ॥ विरलं विराति ॥ तनु तन्यते तनुर्वपुस्त्वचोरित्यक्तत्वात् त्री
णिविरलस्य ॥ समीपः संगताआपोयस्मिन् अपूईत्वं ॥ निकटः निकटति ॥ कटेरच् ॥ आसन्नः आसीदतीस्म क्तः असद्यतेस्मेतिवा ॥ सन्निकृष्टः सन्निकृष्यतेस्म क्तः ॥ सनीडः स
मानंनीडंवासस्थानमस्य सहनीडेनेतिवा ६.६ सदेशः समानोदेशोस्य ॥ अभ्याशः अभ्यश्यते अश्रूव्याप्तौ कर्मणिघञ् ॥ सविधः समानाविधास्य ॥ समर्यादः समानामर्यादा

घनंनीरंतरंसांद्रं पेलवंविरलंतनु समीपेनिकटासन्नसन्निकृष्टसनीडवत् ६६ सदेशाभ्याशासविधसमर्यादसवेशवत् उपकंठां
तिकाभ्यर्णाभ्यग्राअप्यभितोव्ययंम् ६७ संसक्तेत्वव्यवहितमपदांतरमित्यपि नेदिष्टमंतिकतमंस्याद्दूरंविप्रकृष्टकं ६८

स्य ॥ सवेशः समानोवेशोस्य ॥ उपकंठः उपगतः कंठं उपगतःकंठः सामीप्यमस्येतिवा ॥ अंतिकः अंतोस्यास्ति अंतिकंनिकटेवाच्यलिंगस्त्रीशोभनौषधौ चुल्यांज्येष्ठभगिन्यां
चनाद्योक्तांकार्त्यंतौतिकेतिविश्वमेदिन्यौ ॥ अभ्यर्णः अभ्यर्द्यतेस्म अभ्यर्दतिस्मेतिवा अर्दगतौक्तः ॥ अभ्यग्रः अभिमुखमग्रमस्य अभितोव्ययं पंचदशासमीपस्य ६.७ संसक्तं स
सज्यतेस्म षंजसंगे ॥ अव्यवहितं नव्यवधीयतेस्म अपदांतरं पदेनांतरंनपदांतरमत्र ॥ अपदांतरमपि त्रीणिसंलग्नस्य ॥ नेदिष्टं अतिशयेनांतिकं नेदादेशः ॥ अंतिकतमं द्वेअ
तिनिकटस्य ॥ दूरं दुःखेनेयते इणोलोपः रक् ॥ विप्रकृष्टं विप्रकृष्यतेस्म क्तः द्वेदूरं ६८ ७ ७ ७ ७ ७

दवीयः अत्यंतंदूरं ईयसुन्‌इष्ठन्‌ ॥ दविष्ठं ॥ सुदूरं सुतरांदूरं त्रयंअत्यंतदूरस्य ॥ दीर्घं दृणाति दृविदारणे ॥ आयतं आयम्यतेस्म क्तः आयततेवा अच्‌ द्वे दीर्घस्य ॥ वर्त्तुलं उलच्‌
निस्तलं निर्गतंतलमस्य तदुक्तंविश्वे निस्तलं वर्त्तुले चलइति ॥ वृत्तं वर्त्ततेस्म क्तः त्रीणि वर्त्तुलस्य ॥ यदुन्नतानतं तत्‌बंधुरंस्यात्‌ ॥ एकं उन्नतंचदानतंच बध्नाति बंधबंधने मं
दुरादिः बंधूरमित्यपि ६९ उच्चः उच्चिनोति डः उच्चैस्त्वमस्त्यत्रवा मत्वर्थेअच्‌ ॥ प्रांशुः प्रकृष्टाअंशवोयस्य ॥ उन्नतः उन्नमतिस्म नमप्रह्वत्वे क्तः ॥ उदग्रः उद्गतमग्रमस्य ॥ उ
च्छ्रितः उच्छ्रयतिस्म श्रिञ्‌सेवायां उच्छ्रितंत्रिषुसंजातेसमुन्नद्धप्रवृद्धयोरित्युक्तत्वात्‌ ॥ तुंगः तुंज्यते तुजिहिंसायां घञ्‌कुत्वं षट्‌उन्नत स्य ॥ वामनः वामयतिमदं डुवम्‌
उद्गिरणे ल्युः ॥ न्यक्‌ न्यंचति अंचुगतौ न्यक्‌चांतः स्त्रियांतुनीची ॥ नीचः नीचैस्त्वमस्त्यत्र मत्वर्थेअच्‌ नीचः पामरखर्वयोरितिहेमचंद्रः ॥ खर्वः खर्वति खर्वगतौ अच्‌ ॥ ह्रस्वः ह्रस-

दवीयश्चदविष्ठंचसुदूरंदीर्घमायतम्‌ वर्त्तुलंनिस्तलंवृत्तंबंधुरंतून्नतानतम्‌ ६९ उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेथवामने। न्यङ्नीचखर्व
ह्रस्वाःस्युरवाग्रेवनतानतम्‌ ७० अरालंवृजिनंजिह्ममूर्मिमत्कुंचितंनतम्‌ आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि ७१

ति ह्रसशब्दे वप्रत्ययः पंचह्रस्वस्य ॥ अवाग्रं अवनतमग्रमस्य ॥ अवनं अवनमतिस्म क्तः ७० अरालं ऋच्छति ऋगतौ विच्‌ अरमालातिकः अरालातिवा तदुक्तंविश्वे अरालुः कुटिले
सर्जरसेसमदद्वंतिनीति ॥ वृजिनं वृज्यते वृजीवर्जने इनन्‌ तदुक्तंकोशांतरे वृजिनंकिल्बिषेक्लीबंकेशेनाकुटिलेत्रिषु ॥ जिह्मं जहाति हीयतेवा ओहाक्‌त्यागे मन्‌ तदुक्तंहैमे जिह्मस्तुकु
टिलेमंदे जिह्मंतगरपादपइति ॥ ऊर्मिमत्‌ ऊर्मिरस्यास्ति मतुप्‌ ॥ कुंचितं कुंचतिस्म कुचकौटिल्ये क्तः ॥ नतं नमतिस्म तदुक्तं कोशांतरे नतंतगरपादांस्यात्क्लीबंकुटिलनम्रयोरिति ॥ आ
विद्धं आविध्यतेस्म व्यधताडने क्तः तदुक्तंकोशांतरे आविद्धोवाच्यलिंगेस्यात्कुटिलेचपराहतइति ॥ कुटिलं कुटिंकौटिल्यंलाति कुटतिवा कुटि कौटिल्ये इक्‌ तदुक्तंकोशांतरे कुटिलातला 
पगायांस्त्रीभुग्नेतुवाच्यलिंगकः ॥ भुग्नं भुजतिस्म भुजोकौटिल्योक्तः वेल्लितं वेल्लतिस्म वेल्लुचलनेक्तः वेल्लितंगमनेक्लीबंकुटिलेविधुतेत्रिष्वित्युक्तं ॥ वक्रं वंचतिस्म वंचुगतौरक्‌ एका
दशवक्रस्य ७१

(1 A)

ऋजुः अर्जतिअर्जअर्जने अर्जिदृशीतिसाधुः ॥ अजिह्मः भिन्नोजिह्मात् ॥ प्रगुणः प्रकृष्टागुणास्य त्रीण्यवक्रस्य ॥ व्यक्तः व्यस्यतेस्म असुक्षेपणेक्तः तदुक्तंविश्वे व्यस्तस्त्वव्याकुले व्यास इति ॥ अप्रगुणः भिन्नः प्रगुणात् ॥ आकुलः आकोलति कुलसंस्त्याने इगुपेतिकः त्रीणिव्याकुलस्य ॥ शाश्वतः शश्वद्भवः तत्रेत्यण् ॥ ध्रुवः ध्रुवति ध्रुवस्थैर्ये कः ॥ नित्यः नियतंभवः त्यप् ॥ सदातनः सदाभवः ॥ सनातनः सनाभवः सायंचिरेतिसाधु पंचनित्यस्य ७२ स्थास्नुः स्थानशीलः क्स्नुः ॥ स्थिरतरः अतिशयेनस्थिरः तरप् ॥ स्थेयान् स्थेयांसौ स्थेयांसः ईयसुन् एवमूर्त्ध्वं त्रीण्यतिस्थिरस्य यएकरूपतया एकेनैवस्वभावेनकालव्यापी कालस्यव्यापकः आकाशादिः सकूटस्थः कपिस्थइतिकः स्यात् एकं कूटोनिश्चलः सन् तिष्ठती

ऋजावजिह्मप्रगुणौव्यस्तेत्वप्रगुणाकुलौ शाश्वतस्तुध्रुवोनित्यसदातनसनातनाः ७२ स्थास्नुःस्थिरतरःस्थेयानेकरूपतयातुयः का लव्यापीसकूटस्थः स्थावरोजंगमेतरः ७३ चरिष्णुजंगमचरंत्रसमिंगंचराचरं चलनंकंपनंकंप्रंचलंलोलंचलाचलम् ७४

ति तदुक्तंमेदिन्यां कूटोऽस्त्रीनिश्चलेमूलेराशाविति ॥ स्थावरः स्थानशीलः वरच् ॥ जंगमेतरः जंगमादितरः द्वेअचरस्य ७३ चरिष्णु चरणशीलं चरगतौ इष्णुच् ॥ जंगमं वक्रंगच्छति ॥ नित्यमितियङ् ॥ चरं चरति तदुक्तंकोशांतरे चरोस्त्रद्यूतभेदेचभौमेचारेत्रसेचलइति ॥ त्रसं त्रसति त्रसीउद्वेगे अच् ॥ इंगं इंगति इगिगतौ अच् चराचरं चरिचलीतिसाधुः तदुक्तंविश्वमेदिन्योः चराचरंजंगमेस्याद्गंविष्टपयोरपि षट्चरस्य ॥ चलनं चलनशीलं चलगतौ चलनेतियुच् चलनंभ्रमणेकंपेकंप्रेतुवाच्यलिंगकमिति विश्वमेदिन्यौ ॥ कंपनं कंपनशीलं कपिचलने युच् तदुक्तंकोशांतरे कंपनंनद्वयोः कंपेकंप्रेस्यादभिधेयवत् ॥ कंप्रं नमिकंपीतिरः त्रयंकंपनशीलस्य ॥ चलं चलतिअच् ॥ लोलं लोडति लुडविलोडने अच् डलयोरेकत्वं ॥ चलाचलं चरिचलीतिद्वित्वादि ७४

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com